श्री वासुदेव द्वादशार्णव स्तुतिः

श्री वासुदेव द्वादशार्णव स्तुतिः

ओमिति ज्ञानवस्त्रेण रागनिर्णेजनीकृतः |
कर्मनिद्रां प्रपन्नोऽस्मि त्राहि मां मधुसूदन || 1 ||

न गतिर्विद्यते चान्या त्वमेव शरणं मम |
मायापंकेनलिप्तोऽस्मि त्राहि मां मधुसूदन || 2 ||

मोहितो मोहजालेन पुत्रदारगृहादिषु |
तृष्णया पीड्यमानोऽस्मि त्राहि मां मधुसूदन || 3 ||

भक्तिहीनं तु दीनं च दुःखशोकसमन्वितौ |
अनाश्रयमनाथं च त्राहि मां मधुसूदन || 4 ||

गतागतपरिश्रांतो दूरमध्वनि कर्मणां |
संसारभयभीतोऽस्मि त्राहि मां मधुसूदन || 5 ||

वसितो मातृगर्भेषु पीडितोऽहं जनार्दन |
गर्भवासक्षयकर त्राहि मां मधुसूदन || 6 ||

तेन देव प्रपन्नोऽस्मि सत्वाश्रयपरायण |
जरामरणभीतोऽस्मि त्राहि मां मधुसूदन || 7 ||

वाचा तूपकृतं पापं कर्मणा यदुपार्जितं |
मया देव दुराचारं त्राहि मां मधुसूदन || 8 ||

सुकृतं न कृतं किंचित् दुष्कृतं तु सदा कृतं |
तेनाहं परितप्तोऽस्मि त्राहि मां मधुसूदन || 9 ||

देहांतरसहस्रेषु कुयोनिः सेविता मया |
तिर्यक्त्वं मानुषत्वं च त्राहि मां मधुसूदन || 10 ||

वासुदेव हृषीकेश वैकुंठ पुरुषोतम |
सृष्टिसंहारकरण त्राहि मां मधुसूदन || 11 ||

यत्राहमागमिष्यामि नारी वा पुरुषोऽपि वा |
तत्र तत्र च ते भक्तिः त्राहि मां मधुसूदन || 12 ||

द्वादशार्णवस्तुतिमिमां यः पठेच्छृणुयादपि |
स याति परमं स्थानं यत्र योगेश्वरो हरिः || 13 ||

इति श्रीवेदव्यास कृत द्वादशार्णव स्तुतिः ||